ण्युर्न” ऋ० ६।२५।५ । घञर्थे भावे क वा ।२वेगे तुरगः ।

**तुरग** पुंस्त्री तुरेण वेगेन गच्छति गम–ड । घोटके अमरः स्त्रियां जातित्वात् ङीष् ।“तुरगशताकुलस्य परमेकतुरङ्गजन्मनः” । “वल्गन्तु गन्तुं तुरगास्तदोषु:” माघः २चित्ते मेदिनिः। मुग्धबोधे तुरं वेगं गच्छतीति वाक्यम् ।

**तुरगगन्धा** स्त्री तुरगस्येव गन्धोऽस्याः। अश्वगन्धायां राजनि० ६त० । अश्वस्यगन्धे पु० । तुरङ्गगन्धादयोऽप्यत्र रत्नमा० ।

**तुरगदानव** पु० तुरगाकारो दानवः शा०त० । केशिदानवे । “यत्रास्ते स हि दुष्टात्मा केशी तुरगदानवः” “व्रजं तुरगदैत्येन सर्वान् गोपान् जिघांसता” हरिवं० ८१अ० ।

**तुरगब्रह्मचर्य्य** न० तुरस्येव ब्रह्मचर्य्यम् । स्त्रिया अलाभे तत्त्यागरूपे व्रतभेदे त्रिका०।[संगीतदा० उक्ते तालभेदे ।

**तुरगलीलक** पु० “द्रुतं द्वन्द्वं विरामान्तं लघुस्तुरगलीलके”

**तुरगातु** त्रि० तुरेण गातुः गम–वेदे बा० डातु । १त्वरया गमनकारके ।२तूर्णगमने च “अनच्छये तुरगातु जीवमेजद्ध्रुवम्” ऋ० १।१६४।३० । “तुरगातु स्वव्यापाराय गमनम्” भा० ।

**तुरगानन** पु०तुरगस्याननमिवाननमस्य । १किन्नरभेदे तुरङ्गवदने । देशभेदे स च देशः वृ० सं० १४ अ० उत्तरस्यामुक्तः । “उत्तरतः कैलासः” इत्युपक्रमे “त्रिगर्त्ततुरगाननाश्वमुखाः” ।

**तुरगिन्** त्रि० तुरगो वाहनत्वेनास्त्यस्य इनि । अश्वारोहिणिढे मच०। तुरङ्गिन् प्रभृतयोऽप्यत्र “तुरङ्गिभिर्यत्ननिरुद्धवेगाः” माघः ।

**तुरगी** स्त्री तुरगस्तद्गन्धोऽस्त्यस्या अच् गौरा०ङीष् । १अश्वगन्धायाम् मेदि० । तुरग+जातौ ङीष् ।२तुरगजातिस्त्रियाञ्च ।

**तुरङ्ग** पुंस्त्री० तुरेण गच्छति गम–ख मुम् वा डिच्च ।१घोटके स्त्रियां जातित्वात् ङीष् । २चित्ते न० शब्दरत्ना० । “नियोज्य तं होमतुरङ्गरक्षणे” रघुः। तुरगशब्दे उदा० ।

**तुरङ्गक** पु० तुरङ्ग इव कायति कै–क । १हस्तिघोषावृक्षे रत्नमाला० । स्वार्थे क ।२घोटके । [महिषघ्नां राजनि० ।

**तुरङ्गद्विषणी** स्त्री तुरङ्गोद्विष्यतेऽनया बा० क्यु–ङीप् ।

**तुरङ्गप्रिय** पु० ६त० । यवे राजनि० ।

**तुरङ्गम** पुंस्त्री०तुरं गच्छति गम–खच् मुम् । १घोटके अमरः स्त्रियां जातित्वात् ङीष् । “अवेहि मां प्रीतमृते तुरङ्गमात्” रघुः ।“रसातलं संक्रमिते तुरङ्गमे” रघुः ।

**तुरङ्गवक्त्र** पु० तुरङ्गस्येव वक्त्रमस्य । अश्वाकारमुखे किन्नरे जटाधरः तुरङ्गवदनादयोऽप्यत्र अमरहेमचन्द्रौ ।

**तुरङ्गारि** पु० ६त० सैवनेऽश्वनाशके १करवीरे वृक्षे, जात्या तद्वद्वेषित्वात् २महिषे च रत्नमा०। [लतायाम् राजनि०।

**तुरङ्गिका** स्त्री तुरङ्गः तदाकारोऽस्त्यस्याः ठन् । देवदालीतुरङ्गी स्त्री तुरङ्गस्तद्गन्धोऽस्त्यस्याः अच् गौरा०ङीष् ।१अश्वगन्धायां रत्नमा० तुरङ्ग+जातौ ङीष् ।२घोटकजातिस्त्रियाञ्च । [ णी(ण्वी)त् ।

**तुरण** त्वरायां कण्ड्वा० पर० अक० सेट् । तुरण्यति अतुरणीत् ।

**तुरण** न० जु० तुर–बा० भावे क्यु । क्षिप्रगमने “हरेतस्तुरणे तुरण्युः” ऋ०१।१२१।५ । “तुरणे क्षिप्रगमने” भा० ।

**तुरण्य** पु०तुरण्य–कण्ड्वा०भावे घञ् । त्वरायाम् ।“उपमस्तुरण्यसत्” ऋ० ४।४०।२। “तुरण्यसद्दुत्वरया सीदतीति” भा० ।

**तुरण्यु** त्रि०कण्ड्वा०तुरण्य–उन् । त्वरायुक्ते ।“तुभ्यं शुक्रास स्तरयस्तुरण्यवः”ऋ०१।१३४।५।“तुरण्यवः त्वरायुक्ताः”भा०

**तुरम्** अव्य० अद० चु० तुर–बा० अमु । त्वरायाम् । “तुरं यतीषु तुरयन्नृजिप्यः” ऋ० ४।३८।७ ।

**तुरस्** न० अद० चुरा० तुर–असुन् । त्वरायाम् । “आयसस्तुरसे ये” १०।८६।८ ।

**तुरायण** न० तुर–क तस्यायनं “पूर्वपदात् संज्ञायाम्” पा० णत्वम् । १यज्ञभेदे सि०कौ० ।२असङ्गे अमरः त्वरितस्य हि गमनमसङ्गवद्भवतीति तस्य तथात्वम् । ३सत्रभेदे “तुरायणं वैशाखशुक्लपञ्चम्याम्” “चैत्रस्य वा” कात्या० २४।८।१।२ । “तुरायणं सत्रनाम” कर्कः तद्विधानं तत्रैव उत्तरतो दृश्यम् । अत ऊर्द्ध्वमिष्ट्ययनानि” आ० श्रौ० २।१४।१। उपक्रमे । “सांवत्सरिकाणि” २सू०। “इष्ट्ययनानि संवत्सरेण संवत्सरैर्वा साध्यानि” नारा०। तुरायणम् ४सू० तद्दिहितं इष्टिभिरयनं “तुरायणं हि व्रतमयच्छन्दमकृपणोऽकरवं त्रिंशतोऽवदान्”भा० आनु०१०२ अ० । तुरायणं यज्ञभेदमावर्त्तयति ठञ् । तौरायणिक तद्यज्ञकारके ।

**तुरासाह्** पु० तुरं त्वरितं साहयति अभिभवति चु० साहेः क्विप् पूर्वपददीर्घः । १इन्द्रे अमरः अस्य हलादौ सुपि ढस्य ढत्वे षत्वम् । तुराषाट्–अजादौ तु न षत्वं तुरासाहमित्यादि “तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः” कुमा०। “कालेनारिवधात् प्रीतः तुराषाडिव शार्ङ्गिणम्”रघुः“तुराषाट् विश्वमूर्त्ते सुराग्रज !”हरिवं० २५८ अ० । इन्द्रसुतौ ।